## इस्मन्त्रन्क्विषु च । (९७/२९८८)

इस् मन् त्रन् क्वि इत्येतेषु परतः छादेः उपधायाः ह्रस्वो भवति । छदिः । छद्म । छत्रम् । धामच्छत् । उपच्छत् ॥

## गमहनजनखनघसां लोपः क्ङित्यनङि । (९८/२३६३)

गम हन जन खन घस इत्येतेषामङ्गानामुपधाया लोपो भवत्यजादौ प्रत्यये क्ङिति अनङि परतः । जग्मतुः । जग्मुः । जघ्नतुः । जघ्नुः । [1]जज्ञे, जज्ञाते, जज्ञिरे । चख्नतुः । चख्नुः । जक्षतुः । जक्षुः । 'अक्षन् पितरोऽमीमदन्त [2]पितरः' (वा.सं. १९. ३६) । क्ङिति इति किम् ? गमनम् । हननम् । अनङि इति किम्? [3]अगमत् । अघसत् । अचि इत्येव, गम्यते । हन्यते ॥

## तनिपत्योश्छन्दसि । (९९/३५४९)

तनि पति इत्येतयोः छन्दसि विषये उपधाया लोपो भवति अजादौ क्ङिति प्रत्यये परतः । 'वितत्निरे कवयः' (ऋ. १. १६४. ५) । 'शकुना इव पप्तिम' (ऋ. १. १०७. २०) । छन्दसि इति किम् ? वितेनिरे । पेतिम ॥

## घसिभसोर्हलि च । (१००/३५५०)

घसि भस इत्येतयोः छन्दसि[4] उपधाया लोपो भवति हलादौ अजादौ च क्ङिति प्रत्यये परतः । 'सग्धिश्च मे सपीतिश्च मे' (वा. सं. १८. ९) । 'बब्धां ते हरी धानाः' (नि. ५. १२) । सग्धिः इति अदेः क्तिनि 'बहुलं छन्दसि' (२. ४. ३९/३३९८) इति घस्लादेशे उपधायाः लोपे च कृते 'झलो झलि' (८. २. २६/२२८१) इति सकारलोपः । धत्वं तकारस्य, जश्त्वं घकारस्य । ततः समाना ग्धिः सग्धिः इति समासे कृते समानस्य सभावः । बब्धाम् इति भसेर्लोटि तामि श्लौ द्विर्वचने कृते उपधालोपसलोपधत्वजश्त्वानि कर्तव्यानि । द्विर्वचनात् परत्वान् नित्यत्वाच्च उपधालोपः प्राप्नोति, छान्दसत्वात् स तथा न क्रियते । अजादौ[5] – बप्सति । क्ङिति इत्येव, '[6]अंशून् बभस्ति' (काठ. सं. ३५. १४) ॥

## हुझल्भ्यो हेर्धिः । (१०१/२४२५)

हु इत्येतस्माद् झलन्तेभ्यश्चोत्तरस्य हलादेः हेः स्थाने धिरादेशो भवति । जुहुधि । झलन्तेभ्यः – भिन्धि । छिन्धि । हुझल्भ्यः इति किम् ? क्रीणीहि । प्रीणीहि । हेः इति किम् ? जुहुताम्[7] । [8]हलि इत्येव, [9]रुदिहि । स्वपिहि । इह जुहुतात्, भिन्तात् त्वम् इति परत्वात् [10]तातङि कृते सकृद्गतौ 'विप्रतिषेधेन यद् बाधितं तद् बाधितमेव' (चा प. ६०) इति पुनः धिभावो न भवति । भिन्धकि, छिन्धकि इत्यत्र परत्वाद् धिभावे कृते पुनः प्रसङ्गविज्ञानाद् अकच् क्रियते ॥

---

1. जज्ञतुः । जज्ञुः इ. ह. 2. पितरः नास्ति फ. 3. अगमत् नास्ति इ. 4. विषये इत्यधिकम् क. 5. खल्वपि इत्यधिकम् फ. ह. 6. पशून् ह. इ. 7. छिन्ताम् इत्यधिकम् ह. 8. हलादेः इत्येव फ. ह. 9. नास्ति क, स्वपिहि नास्ति इ. 10. तातङादेशस्तत्र फ. ह.